संस्कृत. ग्रं ४८

स्तोत्र.

# विष्णुसहस्रनाम.

६९८/स्तो. ३५२

" Joint project of Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

र्मणां भवतः परमो मतः ॥ किं जपन्मुच्यते जंतुः
जन्मसंसारबंधनात् ॥५॥ श्रीभीष्म उवाच ॥ ज
गत्प्रभुं देवदेवमनंतं पुरुषोत्तमं ॥ स्तुवन्नामसहस्रे
ण पुरुषः सततोत्थितः ॥६॥ तमेव चार्चयंनित्यं
भक्त्या पुरुषमव्ययं ॥ ध्यायंस्तुवन्नमस्यंश्च यज
मानस्तमेव च ॥७॥ अनादिनिधनं विष्णुं सर्वलो
कमहेश्वरं ॥ लोकाध्यक्षं स्तुवंनित्यं सर्वदुःखाति
गो भवेत् ॥८॥ ब्रह्मण्यं सर्वधर्मज्ञं लोकानां की
र्तिवर्धनं ॥ लोकनाथं महद्भूतं सर्वभूतभवोद्भवं ॥९

2

एषमेसर्वधर्माणांधर्मोधिकतमोमतः॥ यद्भक्त्या
पुंडरीकाक्षंस्तवैरर्चेन्नरःसदा॥१०॥ परमंयोमहत्ते
जः परमंयोमहत्तपः॥ परमंयोमहद्ब्रह्म परमंयःप
रायणं॥११॥ पवित्राणांपवित्रंयोमंगलानांचमंग
लं॥दैवतंदेवतानांचभूतानांयोव्ययःपिता॥१२॥
यतःसर्वाणिभूतानिभवंत्यादियुगागमे॥यस्मिं
श्चप्रलयंयांतिपुनरेवयुगक्षये॥१३॥ तस्यलोक
प्रधानस्यजगन्नाथस्यभूपते॥विष्णोर्नामसहस्रं
मेश्रणुपापभयापहं॥१४॥ यानिनामानिगौणा
निविख्यातानिमहात्मनः॥ऋषिभिःपरिगीतानि २

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao

2A

तानि वक्ष्यामि भूपते ॥ १५ ॥ ऋषिर्नाम्नां सहस्रस्य
वेदव्यासो महामुनिः ॥ छंदोनुष्टुप् तथा देवो भग
वान् देवकीसुतः ॥ १६ ॥ विष्णुं जिष्णुं महाविष्णुं प्र
भविष्णुं महेश्वरं ॥ अनेकरूप दैत्यांतं नमामि पुरु
षोत्तमं ॥ १७ ॥ श्रीवेदव्यास उवाच ॥ ओं अस्य श्री
वासुदेव दिव्य सहस्र नाम माला मंत्रस्य ॥ श्री वेद
व्यास ऋषिः ॥ अनुष्टुप् छंदः ॥ श्रीकृष्णः परमात्मा दे
वता ॥ देवकीनंदनः स्रष्टेति शक्तिः ॥ आत्मयोनिः स्व
यंजातेति बीजं ॥ उद्भवः क्षोभणो देव इति मंत्रः ॥ त्रांदव

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

3

मन्नंदक्षीवक्रीलिकीलकं ॥ त्रिसामासामगः साम
इति कवचं ॥ शार्ङ्गधन्वागदाधर इत्यस्त्रं ॥ ओं वि
श्वं विष्णुर्वषट्कार इत्यंगुष्ठाभ्यां नमः ॥ अमृतांशू
द्भवो भानुरिति तर्जनीभ्यां नमः ॥ ब्रह्मविद्ब्राह्मणो
ब्रह्मीति मध्यमाभ्यां नमः ॥ सुवर्णबिंदुरक्षोभ्य इ
त्यनामिकाभ्यां नमः ॥ आदित्यो ज्योतिरादित्य
इति कनिष्ठिकाभ्यां नमः ॥ शार्ङ्गधन्वागदाधर इ
ति करतलकरपृष्ठाभ्यां नमः ॥ ओं विश्वं विष्णुर्वष
ट्कार इति हृदयाय नमः ॥ अमृतांशूद्भवो भानुरिति २

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

3A

शिरसेस्वाहा॥ब्रह्मण्योब्रह्मकृद्ब्रह्मीतिशिखायै
वषट्॥शंखभृन्नंदकीचक्रीतिकवचायहुं॥उदी
र्णःसर्वतश्चक्षुरितिनेत्रत्रयायवौषट्॥शार्ङ्ग
धन्वागदाधरइत्यस्त्रायफट्॥श्रीविष्णोर्दिव्यस
हस्रनामस्तोत्रजपेविनियोगः॥ओंविश्वंविष्णु
मितिध्यानं॥पुरुषोत्तमाराधनेसर्वपापक्षयार्थेज
पेविनियोगः॥ ॥अथध्यानं॥ ॥शांताकारंभुज
गशयनंपद्मनाभंसुरेशंविश्वाधारंगगनसदृशंमे
घवर्णंशुभांगं॥लक्ष्मीकांतंकमलनयनंयोगिभि

the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5)

ध्यानगम्यं वंदे विष्णुं भवभयहरं सर्वलोकैकनाथं ॥
ओं विश्वं विष्णु र्वषट्कारो भूतभव्यभवत्प्रभुः ॥ भू
तकृद्भूतभृद्भावो भूतात्मा भूतभावनः ॥१८॥ पूता
त्मा परमात्मा च मुक्तानां परमा गतिः ॥ अव्ययः पु
रुषः साक्षी क्षेत्रज्ञो ऽक्षर एव च ॥१९॥ योगो योगवि
दां नेता प्रधानपुरुषेश्वरः ॥ नारसिंहवपुः श्रीमान्
केशवः पुरुषोत्तमः ॥२०॥ सर्वः शर्वः शिवः स्थाणुर्भू
तादिर्निधिरव्ययः ॥ संभवो भावनो भर्त्ता प्रभवः प्रभु
रीश्वरः ॥२१॥ स्वयंभूः शंभुरादित्यः पुष्कराक्षो महा ४

Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

4A

स्वनः॥अनादिनिधनोधाताविधाताधातुरुत्त
मः॥२२॥अप्रमेयोहृषीकेशःपद्मनाभोमरप्रभुः॥
विश्वकर्मामनुस्त्वष्टास्थविष्ठःस्थविरोध्रुवः॥२३॥
अग्राह्यःशाश्वतःकृष्णोलोहिताक्षःप्रतर्दनः॥
प्रभूतस्त्रिककुब्धामपवित्रंमंगलंपरं॥२४॥
ईशानःप्राणदःप्राणोज्येष्ठःश्रेष्ठःप्रजापतिः॥
हिरण्यगर्भोभूगर्भोमाधवोमधुसूदनः॥२५॥ई
श्वरोविक्रमीधन्वीमेधावीविक्रमःक्रमः॥अनुत्त
मोदुराधर्षःकृतज्ञःकृतिरात्मवान्॥२६॥सुरेशः

(5) रणंशर्मविश्वरेताःप्रजाभवः॥अहःसंवत्सरोव्या
ळः प्रत्ययःसर्वदर्शनः॥२७॥अजःसर्वेश्वरःसिद्धःसि
द्धिःसर्वादिरच्युतः॥वृषाकपिरमेयात्मासर्वयोग
विनिःसृतः॥२८॥वसुर्वसुमनाःसत्यःसमात्मासं
मितःसमः॥अमोघःपुंडरीकाक्षोवृषकर्मावृषाकृ
तिः॥२९॥रुद्रोबहुशिराबभ्रुर्विश्वयोनिःशुचिश्रवाः
॥अमृतःशाश्वतःस्थाणुर्वरारोहोमहातपाः॥३०॥स
र्वगःसर्वविद्भानुर्विष्वक्सेनोजनार्दनः॥वेदोवेदविद
व्यंगोवेदांगोवेदवित्कविः॥३१॥लोकाध्यक्षःसुराध्य ६

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

5 A

क्षो ह धर्माध्यक्षः कृताकृतः॥ चतुरात्मा चतुर्व्यूहश्च
तुर्दंष्ट्रश्चतुर्भुजः॥ २२॥ भ्राजिष्णुर्भोजनं भोक्ता स
हिष्णुर्जगदादिजः॥ अनघो विजयो जेता विश्वयो
निः पुनर्वसुः॥ २३॥ उपेंद्रो वामनः प्रांशुरमोघः शुचि
रूर्जितः॥ अतींद्रः संग्रहः सर्गो धृतात्मा नियमो यमः
॥ २४॥ वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः॥
अतींद्रियो महामायो महोत्साहो महाबलः॥ २५॥ म
हाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः॥ अनिर्देश्य
वपुः श्रीमानमेयात्मा महाद्रिधृक्॥ २६॥ महेष्वासो

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

6

महीभर्त्ताश्रीनिवासःसतांगतिः॥अनिरुद्धःसुरा
नंदोगोविंदोगोविदांपतिः॥३७॥मरीचिर्दमनोहंसः
सुपर्णोभुजगोत्तमः॥हिरण्यनाभःसुतपाःपद्मना
भःप्रजापतिः॥३८॥अमृत्युःसर्वदृक्सिंहःसंधा
तासंधिमान्स्थिरः॥अजोदुर्मर्षणःशास्ताविश्रु
तात्मासुरारिहा॥३९॥गुरुर्गुरुत्तमोधामसत्यः
सत्यपराक्रमः॥निमिषोनिमिषःस्रग्वीवाचस्प
तिरुदारधीः॥४०॥अग्रणीर्ग्रामणीःश्रीमान्न्यायो
नेतासमीरणः॥सहस्रमूर्धाविश्वात्मासहस्राक्षः
सहस्रपात्॥४१॥आवर्त्तनोनिवृत्तात्मासंवृत्तः ६

6A

संप्रमर्दनः॥अहः संवर्त्तकोवन्हिरनिलोधरणीध
रः॥४५॥सुप्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्
विभुः॥सत्कर्त्तासत्कृतः साधुर्जन्हुर्नारायणोनरः
॥४६॥असंख्येयोप्रमेयात्मा विशिष्टः शिष्टकृछु
चिः॥सिद्धार्थः सिद्धसंकल्पः सिद्धिदः सिद्धिसा
धनः॥४७॥वृषाहीवृषभोविष्णुर्वृषपर्वावृषोद
रः॥वर्धनोवर्धमानश्चविविक्तः श्रुतिसागरः॥४८
सुभुजोदुर्धरोवाग्मीमहेंद्रोवसुदोवसुः॥नैकरू
पोबृहद्रूपश्शिपिविष्टः प्रकाशनः॥४९॥ओज
स्तेजोद्युतिधरः प्रकाशात्माप्रतापनः॥रृद्धस्पष्टा

Joint project of Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

7

स्सुरो मंत्रश्चंद्रांशुर्भास्करद्युतिः ॥ ४७ ॥ अमृतांशूद्भ
वो भानुः शशिबिंदुः सुरेश्वरः ॥ औषधं जगतः सेतुः
सत्यधर्मपराक्रमः ॥ ४८ ॥ भूतभव्यभवन्नाथः पवनः
पावनोनलः ॥ कामहा कामकृत्कांतः कामी कामप्रदः
प्रभुः ॥ ४९ ॥ युगादिकृद्युगावर्तो नैकमायो महाश
नः ॥ अदृश्यो व्यक्तरूपश्च सहस्रजिदनंतजित् ॥ ५०
इष्टो विशिष्टः शिष्टेष्टः शिखंडी नहुषो वृषः ॥ क्रोध
हा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः ॥ ५१ ॥ अच्युतः
प्रथितः प्राणः प्राणदो वासवानुजः ॥ अपांनिधिर
धिष्ठानमप्रमत्तः प्रतिष्ठितः ॥ ५२ ॥ स्कंदः स्कंदधरो ७

7A

धुपेविरदोवासुवाहनः॥वासुदेवोबृहद्भानुरादि
देवःपुरंदरः॥५३॥अशोकःस्तारणस्तारःश्वरःशौ
रिर्जनेश्वरः॥अनुकूलःशतावर्त्तःपद्मीपद्मनिभेक्ष
णः॥५४॥पद्मनाभोरविंदाक्षःपद्मगर्भःशरीरभृत्
॥महर्धिरृद्धोवृद्धात्मामहाक्षोगरुडध्वजः॥५५॥
अतुलःशरभोभीमःसमयज्ञोहविर्हरिः॥सर्वलक्षण
लक्षण्योलक्ष्मीवान्समितिंजयः॥५६॥विक्षरोरो
हितोमार्गोहेतुर्दामोदरःसहः॥महीधरोमहाभोगो
वेगवानमिताशनः॥५७॥उद्भवःक्षोभणोदेवःश्री
गर्भःपरमेश्वरः॥करणंकारणंकर्त्ताविकर्त्तागहनो

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(8)

गुहः॥५८॥व्यवसायोव्यवस्छानःसंस्छानस्छान
दोध्रुवः॥परर्धिपरमस्पष्टःस्तुष्टःपुष्टःशुभेक्षणः
॥५९॥रामोविरामोविरजोमार्गोनेयोनयोनयः॥
वीरःशक्तिमतांश्रेष्ठोधर्मोधर्मविदुत्तमः॥६०॥वैकुं
ठःपुरुषःप्राणःप्राणदःप्रणवःपृथुः॥हिरण्यगर्भः
शत्रुघ्नोव्याप्तोवायुरधोक्षजः॥६१॥ऋतुःसुदर्श
नःकालःपरमेष्ठीपरिग्रहः॥उग्रःसंवत्सरोदक्षोवि
श्रामोविश्वदक्षिणः॥६२॥विस्तारःस्छावरःस्छाणुः
प्रमाणंबीजमव्ययं॥अर्थोनर्थोमहाकोशोमहाभो
गोमहाधनः॥६३॥अनिर्विण्णःस्छविष्ठोभूर्धर्मयू ८

Rajwade Sanshodhan Mandal, Dhule and the Vedic Heritage Portal, Mumbai — Joint project

8A

पोमहामखुः॥ नक्षत्रनेमिर्नक्षत्री क्षामः क्षामःस
मीहनेः॥६४॥ यज्ञइज्योमहेज्यश्च क्रतुःसत्रः स
तांगतिः॥ सर्वदर्शी विभुरात्मा सर्वज्ञोज्ञानमुत्त
मं॥६५॥ सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः
सुहृत्॥ मनोहरो जितक्रोधो वीरबाहुर्विदारणः
॥६६॥ स्वापनः स्ववशो व्यापि नैकात्मानेककर्मकृ
त्॥ वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः॥६७
धर्मगुप् धर्मकृद्धर्मः सदसत्क्षरमक्षरं॥ अविज्ञा
तासहस्रांशुर्विधाता कृतलक्षणः॥६८॥ गभस्ति
नेमिःसत्वस्थः सिंहोभूतमहेश्वरः॥ आदिदेवोम

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

९

हादेवो देवेशो देवभृद्गुरुः ॥६९॥ उत्तरो गोपतिर्गोप्ता ज्ञा
नगम्यः पुरातनः ॥ शरीरभूतभृद्भोक्ता कपींद्रो भूरिद
क्षिणः ॥७०॥ सोमपोमृतपः सोमः पुरुजित्पुरुसत्त
मः ॥ विनयो जयः सत्यसंधो दाशार्हः सात्वतांपतिः
॥७१॥ जीवो विनयिता साक्षी मुकुंदोमितविक्रमः ॥
अंभोनिधिरनंतात्मा महोदधिशयोंतकः ॥७२॥ अ
जो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः ॥ आनंदो
नंदनो नंदः सत्यधर्मा त्रिविक्रमः ॥७३॥ महर्षि
कपिलाचार्यः कृतज्ञो मेदिनीपतिः ॥ त्रिपदस्त्रि
दशाध्यक्षो महाशृंगः कृतांतकृत् ॥७४॥ महावरा
हो गोविंदः सुषेणः कनकांगदी ॥ गुह्यो गभीरो गहनो १

9A

गुप्तश्चक्रगदाधरः॥७५॥ वेधाः स्वांगोजितः कृ
ष्णो दृढः संकर्षणोच्युतः॥ वरुणो वारुणो वृक्षः पु
ष्कराक्षो महामनाः॥७६॥ भगवान् भगहानंदीव
नमाली हलायुधः॥ आदित्यो ज्योतिरादित्यः स
हिष्णुर्गतिसत्तमः॥७७॥ सुधन्वा खंडपरशुर्दारु
णो द्रविणप्रदः॥ दिवस्पृक् सर्वदृग्व्यासो वाचस्प
तिरयोनिजः॥७८॥ त्रिसामा सामगः सामनिर्वा
णं भेषजं भिषक्॥ संन्यासकृच्छमः शांतो निष्ठा शां
तिः परायणः॥७९॥ शुभांगः शांतिदः स्रष्टा कुमु
दः कुवलेशयः॥ गोहितो गोपतिर्गोप्ता वृषभाक्षो वृष

" Joint project of the Bajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(10)

प्रियः॥८०॥अनिवर्तीनिवृत्तात्मासंक्षेप्ताक्षेम
कृच्छिवः॥श्रीवत्सवक्षाश्रीवासःश्रीपतिःश्री
मतांवरः॥८१॥श्रीदःश्रीशःश्रीनिवासःश्रीनि
धिःश्रीविभावनः॥श्रीधरःश्रीकरःश्रेयःश्रीमां
लोकत्रयाश्रयः॥स्वक्षःस्वंगःशतानंदोनं
दिर्ज्योतिर्गणेश्वरः॥विजितात्माविधेयात्मास
त्कीर्तिश्छिंनसंशयः॥उदीर्णःसर्वतश्च
क्षुरनीशःशाश्वतःस्थिरः॥भूशयोभूषणोभू
तिर्विशोकःशोकनाशनः॥८२॥अर्चिष्मान



Joint project of Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

10A

र्चितः कुंभो विशुद्धात्मा विशोधनः ॥ अनिरुद्धोऽप्र
तिरथः प्रद्युम्नोऽमितविक्रमः ॥ ८५ ॥ कालनेमिनि
हा वीरः शूरः शौरिर्जनेश्वरः ॥ त्रिलोकात्मा त्रिलोके
शः केशवः केशिहा हरिः ॥ ८६ ॥ कामदेवः कामपालः
कामी कांतः कृतागमः ॥ अनिर्देश्यवपुर्विष्णुर्वीरोऽनं
तो धनंजयः ॥ ८७ ॥ ब्रह्मण्यो ब्रह्म विद्ब्रह्मी ब्रह्मब्र
ह्मविवर्धनः ॥ ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्रा
ह्मणप्रियः ॥ ८८ ॥ महाक्रमो महाकर्मा महातेजा
महोरगः ॥ महाक्रतुर्महायज्वा महायज्ञो महाह

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com